**आकाशवाणी**

**दिनाङ्क :- 22.08.2024 सायम 06:20**

**<u>आदौ-मुख्यवार्ता:</u>**

- प्रधानमंत्री नरेन्द्र मोदी अद्य वारसॉव नगरे पॉलैंडस्य प्रधानमन्त्रिणा डोनाल्ड टस्क इत्यनेन सह प्रतिनिधिस्तरीयं संवादं करोति।
- भारतस्य प्रतिवचनम् अस्ति यत् बांग्लादेशे जलौघस्य स्थिति: त्रिपुरायाः गुमती नद्याः भारतीयबंधस्य जलस्य त्यागस्य कारणेन नास्ति।
- अखिल भारतीय आवासीय चिकित्सक संघेन चिकित्साविज्ञानसंस्थानं डॉ. राममनोहर लोहिया चिकित्सालयेन च कर्मविरामः स्थगितः।
- आतङ्कवादः शान्तिविकासाय वैश्विकः समाह्वानम् अस्ति इति भारतेन उक्तं, आतङ्कवादविरोधी व्यापक अन्तर्राष्ट्रीयसम्मेलनस्य आह्वानं च कृतम्।
- राष्ट्रपति: द्रौपदी मुर्मु: राष्ट्रपति भवने वैज्ञानिकान् सम्मानितवती, प्रोफेसर गोविन्द राजन् पद्मनाभन् वर्याय प्रदत्त: अस्य वर्षस्य विज्ञानरत्नपुरस्कार: ।
- दिल्ल्यारक्षिबलस्य विशिष्टदलेन उत्तर प्रदेशे, राजस्थाने झारखण्डे च सप्तदश स्थानेषु सहसान्वेषणम् आचरितम्।

**<u>प्रधानमंत्री-पोलैंड</u>**

प्रधानमंत्री नरेन्द्र मोदी अद्य अपराह्णे वारसॉव नगरे पॉलैंडस्य प्रधानमन्त्रिणा डोनाल्ड टस्क इत्यनेन सह प्रतिनिधिस्तरीयं संवादं करोति। द्वौ नेतारौ परस्परं उभयो: देशयो: संबंधानां पुनरवलोकनं कृत्वा विविधविषयानां विषये च विचार-विनिमयं करिष्यतः।

एतद् उपवेशनं परस्परं रुचीनां क्षेत्राणां विषयाणां च अन्वेषणाय उभाभ्याम् अवसरं प्रदास्यति। अद्य प्रधानमंत्री नरेन्द्र मोदी वारसॉव नगरस्य चांसलरी इत्यस्मिन् स्थाने

पूर्ण राजकीय- सामारोह- पूर्वकं सत्कृतो जात: । मोदिन: स्वागताय पॉलैंडस्य प्रधानमन्त्री डोनाल्ड तस्क् अपि अवसरेऽस्मिन् उपस्थित: आसीत्।

द्विपक्षीय वार्तालापस्य अनन्तरं, श्री मोदी पॉलैंडस्य राष्ट्रपतिं आंद्रेज् डूडा इत्यमुं मिलिष्यति। ततश्च प्रधानमन्त्री अज्ञात सैनिकानां समाधौ पुष्पमालां अर्पयिष्यति। श्री मोदी तत्र पोलैंड देशे भारतीय-व्यापारिभि: व्यावसायिभि: साकम् संवादम् अपि

आयोजयिष्यति।

गत रात्रौ वारसॉव नगरे भारतीय प्रवासिन: उद्दिश्य भाषमाणः प्रधानमन्त्री मोदी उक्तवान् यत भारतं सर्वै: सह सम्पर्कं साधयितुम् इच्छति, सर्वेषां विकासं च कल्याणं च कामयते।

मोदी उक्तवान् यत्, भारतं भूरि वर्षाणि यावत् अन्येभ्य: देशेभ्य: दूरवर्तनस्य नीतिं उपयुक्तवान्, किन्तु अद्य भारतस्य नीति सर्वेषां राष्ट्राणां समीपं गमनस्य अस्ति। प्रधानमन्त्रिणा स्पष्टं उक्तम् अस्ति यद् अयं युद्धस्य कालः नास्ति, संवादेन कूटनीत्या च संघर्षस्य समाधानं कर्तुं भारतम् विश्वासं करोति।

प्रधानमन्त्री मोदी क्षेत्रस्य शान्तिम् उद्दिश्य भारतस्य दृष्टिकोणं उद्घाटितवान्। विश्वं भारताय विश्व बन्धुरूपेण सम्मानं ददाति। पॉलैंड देश: मध्य-यूरोपे भारतस्य महत्वपूर्णः सहभागी देश: अस्ति। भारतस्य पॉलैंड देशेन सह द्विपक्षीय व्यापारः प्राय: षट्-अर्बुद-डॉलर्स् मित: अस्ति। मोदिन: इयं यात्रा भारतस्य महत्वपूर्ण-यूरोपीय-देशै: साकं सम्बन्धानाम् अभिवृद्धिं दर्शयति, अथ च भारतस्य अन्ताराष्ट्रिय संबंधेषु सक्रियतां प्रदर्शयति।

**यूक्रेन यात्रा**

स्वकीय द्वयो: राष्ट्रयो: यात्रायाः द्वितीये अंतिमे च चरणे, प्रधानमंत्री नरेंद्र मोदी यूक्रेनस्य राष्ट्रपते: वलोदिमिर ज़ेलेंस्की इत्यस्य निमंत्रणे तत्र गमिष्यति। द्विनवति-

उत्तर-एकोनविंशति-तमे वर्षे यूक्रेन-भारतयो: मध्ये राजनयिकसंबंधाः स्थापिता: आसन्, राजनयिकसंबंधानां स्थापनानन्तरं प्रथमवारं भारतीयप्रधानमंत्रिण: यूक्रेनस्य एषा यात्रा अस्ति। कीव नगरे प्रधानमंत्री मोदी तत्रत्येन राष्ट्रपतिना सह व्यापार-निवेश-शिक्षा- सांस्कृतिक-संबंधानां विषये चर्चा करिष्यति।

-

**<u>विराम:</u>**

**संस्कृतवार्तायाः संस्करणमिदम इदानीम आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले <u>www.newsonair.gov</u>.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**<u>बांग्लादेशे जलौघ:</u>**

भारतस्य प्रतिवचनम् अस्ति यत् बांग्लादेशे जलौघस्य स्थिति: त्रिपुरायाः गुमती नद्याः भारतीयबंधस्य जलस्य त्यागस्य कारणेन नास्ति। विदेशमंत्रालयः अद्य घोषणाम् अपि कृतवान् अस्ति यत् बांग्लादेशे इदम् मन्यते यत् बांग्लादेशस्य पूर्वीयसीम-क्षेत्रीय-जनपदेषु जलौघस्य स्थिति: त्रिपुरायाः गुमती नद्याः डंबुरबंधस्य जलस्य त्यागस्य कारणेन अस्ति इति। मंत्रालयः एतत् सर्वं मिथ्या उक्तवान्।

विदेशमंत्रालयस्य अनुसारम्, डंबुरबंधः बांग्लादेशस्य सीमात: विंशत्युत्तर-एकशत किलोमीटर मिते दूरे अस्ति।

मंत्रालयः उक्तवान् यत् भारतं द्विपक्षीय परामर्षेण चर्चा माध्यमेन च नदीजलप्रबंधनस्य समस्यानां समाधानं कर्तुम् प्रतिबद्धम् अस्ति।

**<u>भारतं यूएनएससी</u>**

आतङ्कवादः शान्तिविकासाय वैश्विकः समाह्वानम् अस्ति इति भारतेन उक्तं, आतङ्कवादविरोधी व्यापक अन्तर्राष्ट्रीयसम्मेलनस्य आह्वानं च कृतम्। भारतस्य संयुक्तराष्ट्रसङ्घ मिशनेत्यस्य प्रभारी आर.रविन्द्रः परिषदः अध्यक्षः सिएरा लियोन इत्येषः शान्तिनिर्माण स्थापनायाः च विषये उच्चस्तरीयमुक्तविमर्शे वदति स्म, यत् शान्तिनिर्माणार्थं विकासस्य महत्त्वम् अवलोकयता भारतं वैश्विकदक्षिणदेशैः सह व्यापकविकाससहभागिता कृता अस्ति तथा च एतासां विकासपरियोजनानां सञ्चितमूल्यं अधुना चत्वारिंशत् अरब डॉलर मुल्यात् अधिकं अस्ति।

श्रीरविन्द्रमहोदयः अवदत् यत् भारतं संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषदः स्थायीसदस्यतायाः विस्तारस्य विरोधं कुर्वतां जनानां समर्थनं न करोति, ये आफ्रिकादेशं तस्य योग्यस्थानात् दुरं कुर्वन्ति।

## विज्ञान-पुरस्कार:

राष्ट्रपति: द्रौपदी मुर्मु: राष्ट्रपति भवने वैज्ञानिकान् सम्मानितवती, प्रोफेसर गोविन्द राजन् पद्मनाभन् वर्याय प्रदत्त: अस्य वर्षस्य विज्ञानरत्नपुरस्कार: । कृषि विज्ञानस्य क्षेत्रे विज्ञानश्री: सम्मान: डॉ आनन्दरामकृष्णन् वार्याय समर्पित:। परमाणु ऊर्जा क्षेत्रे च एष: सम्मान: मुम्बई-भाभा-परमाणु-अनुसंधान-केंद्रस्य डॉ आवेश कुमार त्यागी वर्याय प्रदत्त: जीव-विज्ञान-क्षेत्रे विज्ञानश्री: सम्मान: पुणे स्थितस्य भारतीयविज्ञानशिक्षानुसन्धान संस्थानस्य प्रोफेसर जयंत भालचंद्र उडगांवकर वर्याय दत्त:

## भारतीय आवासीय चिकित्सक

अखिल भारतीय आवासीय चिकित्सक संघेन चिकित्साविज्ञानसंस्थानं डॉ. राममनोहर लोहिया चिकित्सालयेन च कर्मविरामः स्थगितः। भारतस्य सर्वोच्चन्यायालयस्य निर्देशस्य प्रतिक्रियारूपेण एषः निर्णयः कृतः। एम्स आरडीए इत्येतौ विज्ञप्तौ उक्तवन्तौ यत् आरजी कर चिकित्सा महाविद्यालयस्य घटनायाः अनन्तरं देशे सर्वत्र

स्वास्थ्यसेवाकर्मचारिणां व्यापकसुरक्षायाः विषये सर्वोच्च न्यायालयस्य स्वत: संज्ञानं कार्याचरणं च  प्रशंसनीयम् अस्ति।

**दिल्ल्यारक्षिबलस्य- सहसान्वेषणम**

दिल्ल्यारक्षिबलस्य विशिष्टदलेन  उत्तर प्रदेशे, राजस्थाने  झारखण्डे  च  सप्तदश स्थानेषु सहसान्वेषणम् आचरितम्। अलकायदा-आतङ्कि-मॉड्यूल इत्यनेन सम्बद्धाः प्रायः चतुर्दश संदिग्धा: आतंकिन : निगडिता: सन्ति। राजस्थानस्य भिवाडीतः षट् जनाः निगडिताः ये शस्त्रप्रशिक्षणं कुर्वन्तः आसन्।  एतदतिरिक्तं झारखण्डात् उत्तरप्रदेशात् च प्रायः अष्टौ संदिग्धाः निगडिताः।रांच्या: चिकित्सकः इश्तियाक:  एनं मॉड्यूल इत्याख्यं प्रकल्पं सञ्चालयति स्म। सः  देशे गभीरं आतङ्कवाद-क्रियाकलापं निष्पादयितुं  सज्जता कुर्वन आसीत्।  सम्प्रति विभिन्नस्थानेषु निरीक्षणं प्रचलति।  राँचीनगरे पञ्चदश, राजस्थाने एकं, अलीगढे च एकं स्थानेषु सहसान्वेषणं जायते।  अनेकस्थानात् शस्त्राणि, विस्फोटकादीनि च प्राप्तानि।  दिल्ल्यारक्षीदलस्य विशिष्टदलेन झारखण्डस्य, राजस्थानस्य, उत्तरप्रदेशस्य च राज्यारक्षीबलानाम् समन्वयेन गुप्तचर्याधारितकार्यक्रमाः कृताः।

**वक्फ विधेयक**

प्रवर्तमान-वर्षस्य वक्फ संशोधन विधेयके संयुक्तसंसदीयसमिते: प्रथमोपवेशनम् अद्य  नव दिल्ल्यां सम्पन्नम् ।  एकत्रिंशत् सदस्यीयसमिते: अध्यक्ष: भाजपा सांसद: जगदंबिका पाल: वर्तते ।  अस्यां समित्यां एकविंशति:  सदस्या: लोकसभाया:  दश सदस्या: च  राज्यसभाया:   सन्ति । समिति:  लोकसभाद्वारा प्रस्तुत-विधेयकस्य  अन्वीक्षणं करोति। उपवेशनावसरे  अल्पसंख्याक प्रकरणानां मन्त्रालयस्य विधि-न्याय-मन्त्रालयस्य अधिकारिभिश्च सदस्येभ्यः प्रारूपविधौ  प्रस्तावित-विभिन्न-संशोधनानां विषये विवरणं प्रदत्तवन्त:

**।। इति वार्ताः।।**